णीयादिप्रधाननप्राकृतेष्वेतेस्वराविधीयंते॥उपांशुत्वंतदितरपदार्थेषुसावकाशं॥एवंपरेण॥यथाबहिष्पवमा
नार्थंसदसिप्रवर्तितामन्योन्यवचनाधारणेविहितेयथायुक्तापद्धिंधारररहिणंपदंसमाप्यपुनर्यजेततत्रतद्घा
घत्सर्वस्मिन्दास्यंस्यादित्युक्तत्रपच्छेदेप्रायश्चित्तंविहितंयदिप्रतिहर्त्ताअपच्छिद्यात्सर्ववेदसंदद्यादितिप्रहत्रपच्छेदेत
त्रयुगपदुद्गात्रोरपच्छेदेप्रायश्चित्ते योर्विरोधात्किंकार्यः॥पौर्वापर्येपरंकार्यं॥तस्यपूर्वनैरपेक्ष्येणपूर्वा
पमर्देनवात्मलाभात्॥यत्रतुपूर्वसापेक्षःपरस्यात्मलाभस्तत्रपूर्वंबलीयः॥यथापूर्वोक्तेवाक्योदाहरणे
तदुक्तंपूर्वात्परबलीयस्त्वंतत्रनामयत्रायतीनामन्योन्यनिरपेक्षाणांयत्रजन्मऽभियांनवेदिति॥स्वंगंप्रधा
नेन॥यथादर्शपूर्णमासयोरग्निहोत्रहवण्याहवींषिनिर्वपतीतिविहितोनिर्वापःपवमानेष्टिष्वतिदिष्टः॥
तत्राख्यारमतेष्ट्याधानयोःसमभाव्यमानेनाम्नयर्थत्वाद्धानिविकारमतेनपवमानेष्टिगुणका
धानस्यांगत्वात्पवमानेष्टिकालेआहवनीयाद्यभावेनाग्निहोत्रहवण्यप्रवृत्तेरग्निहोत्रहवण्या एवमाधेत्पतिवाधो
नुष्ठेयस्तस्यप्रधानत्वेनांगबाधकत्वात्॥ननातुतत्रनुक्तेःप्रधानबाधकः॥सांगंप्रधानंतासेनयथा

पवमाने ३

६२ वद्दक्ष्यापभुनासोमेनयायजेत सोमावास्यायांपूर्णमास्यांवायजेतेतिवाक्येनदीक्षणीयादीनांपर्वकालमेवं
वेसोमांगत्वेपेक्षालेनदीक्षणीयाद्यंगपर्वकालबाधः॥सांगसोमस्यपंचाहःसाध्यत्वेनोनेयानुष्ठायोगात्॥
एवमन्येविवाक्यस्तत्रवक्ष्यंतहृत्यलं॥ सुविनुत्र्याहतवेदेवतानांसमुच्चयंबोधयतिप्रयोगविधिः॥एषामेदानेष्वेषु
पदिष्टानामुपहोमानामतिदिष्टानांनारिष्टहोमानांचात्रप्राकृतविध्युद्धारपाठेनतत्रैवानुष्ठानादेकस्थानत्वेपिदे
दशर्पत्वेनप्रत्याम्नानाभावान्नबाधः॥किंतुप्राकृतोत्तरंवैकृतानांसमागतस्मांमनुष्ठानं॥एतेनुबादरायणादूति
न्यायात्॥एवंसोमहर्णामामनहोमैरनुयाजानांत्रित्वसाम्येननबाधः किंत्वदृष्टार्थत्वात्समुच्चयः॥एवंवरेष्वति
सवासहोबार्हस्पत्यंग्रहेगृह्णातीत्युपदिष्टग्रहस्यसोमेष्टवायवादिप्राकृतैःसमुच्चयः प्रकृतौतस्यापिसोमस्यभागत्वेर्थेसं गृहे
३ मवेनग्रहाणामदृष्टार्थत्वात्॥नवा[illegible]लाभवाक्यात्प्रकृतग्रहानुवादेनदेवतामात्रविधानमितिवाच्यं॥प्राकृतग्रहानुवादे
नदेवताविधौतेषांप्रकृत्याग्नेयाग्रहोद्भूतिचद्दृहवचनापत्तेः॥एवमन्यत्राप्यूह्यं॥बाधकन्यतुपात्याज्ञेयत्तयावधारित
पदार्थानामनेकप्रमाणसन्निपातेनतदर्थंतयाकृतिंतंत्रेणप्रयोगमनुष्ठापयति[illegible]प्रयुक्तमेवस्वस्वप्रकरण युं
तोमत्यामपिउपजीवति॥ किंविस्तरार्थमेवोपजीवनप्रयोजनवाक्यं॥आग्नेयादयोदर्शपूर्णमासप्रयोगविधिचोदितायागाःस्वार्थंप्रयाजादीनंगत्वेना
गविशेषतामनुस्वरूपेणानुष्ठापयति॥नचायंविशेषोनोपयुक्तेकिंमन्त्रवत्ताःप्रयाजादयःआग्नेयादितुल्यकालायापीडितास्तेनत्रयाणामनसिविप ६२
दिवतेस्वयागानप्युपकुर्वंति॥एवंप्राकृतप्रयोगपर्वणोत्तरवेदिकालेप्रधानानांतंत्रंप्रयाजादयः॥यत्रतुदेशकालकर्त्रादिभेदाद्विशेषो २७
गृह्यतेतत्रावृत्तिःयथादर्शपूर्णमासेयवकालभेदानुष्ठानत्वभेदाद्यथाशाभावत्ति॥श्रीवीरेश्वरप्रसन्नोस्तु

२

यत्रत्वेकस्य तंत्रे प्रसतेम ध्येन्यद्विनीयते यथाग्निषोमीयस्य वपयात्र यथाग्निषोमीयं पुरोडाशम
नुनिर्वपतीत्याग्निषोमीय पशुयागतंत्रे प्रततेपुरोडाशयागः स यद्यपि हि दैवतत्वादाग्नेषोमी
नं यविकारस्तथाप्यतिदिष्टांगमहत्तान्प्रयाजादीन्नानुष्ठापयति॥ उपकारायहिपदार्थानुष्ठापनं स च पश्व
र्थमनुष्ठितैर्जनितो लब्ध इति किं एषगानुष्ठापनेन॥ यद्यपि पश्वर्थमेकादश संख्याः प्रयाजानुयाजाः
क्रियंते एषदाज्यइत्यका घ्यानुयाजा इत्यादिवत् यथा प्रजंति पुरोडाशस्यतु यथा घलत्यपेक्षितास्त
थाप्युपकारस्याविलंबतत्वात्तदार्थवैलक्षण्येपि दत्ते नादरेण उपकारमात्रमपेक्षितं गृहीत्वा पुरोडाशप्र
दा योगविधिर्नं यथा न नुष्ठापयति सोयं प्रसंगः॥ यथा ज्ञामात्रार्थं स तो दीपः कि ष्ठस्योपकरोतीति॥ इत्याय
लुपमुनास्यापेक्षितं नानुष्ठापितीतस्वयमनुष्ठापयति यथा न तोप क्षौक रोतीति निबन्धत्वशावाज्य भागविक
ज्ये यदा नाज्यभागौ क्रियेते तदा यमनुष्ठापयति पिष्टलेपहोमादिकं ये तेना प्रयोजकत्वं॥ यस्तु पर प्रयुक्तशक्तिप
रहितापर प्रयुक्तमुजीवति सोऽप्रयोजकः यथा वाजिनयाग प्रयोजकविधिः॥ तद्यथापयसि दध्यानयनेन त
प्तं पयः संस्कृयो हि त्यर्थः॥ अगोरगा वो वास्यंता मिति वत्॥ हष्टश्च दध्यानयनेन पयसो वानीनावस्रूपः संस्का
रः॥ तेन सा वैश्वदेव्यामिक्षेत्युत्तरवाक्येतस्य देवतारूपेणेकार्थो परः यः परामृश्यतत्र विश्वेदेव देवोमा
दध्यानयतीति

भिक्षापरत्वाच्चं चेत्तिज्ञायते॥ आमिक्षायांशिनि प्राधान्येन वचनेन स्त्रीलिंगमनुवादः तेन पयस्य एव च मा न तु तमामिक्षा॥
तदर्थेन तद्ध्यायनेनेनानुनिष्पन्नवाजिनेन वाजिनं त्वस्यो वाजिनमिति विविधं वाजिदेवत्ययागं गत्वेन विनियुंक्ते॥ न तु द
ध्यानयने प्रयुंक्ते॥ वाजिनार्थत्वेन तस्याविधानात्॥ तेन वाजिन नाशेन पुनर्दध्यानयनं कार्यमित्य प्रयोजकत्वे
द ध्यानयनस्य॥ तथैकहायन्या चिक्रीणातीति प्रकृत्य श्रूयते षट् पदान्यनुनिष्क्रम्य सप्तमं पदम् अध्वर्युरंजलिना स
गृह्णाति यर्हि हविर्धाने प्राचीप्रवर्तयेयुः तर्हि तेनाक्षमुपांज्यादिति सप्तमपदस्याभ्यञ्जनमेकहायन्या
नयनस्य प्रयोजकं॥ क्रयार्थत्वादेकहायनीनयनेऽपि तदनुनिष्पादि सप्तमपद[illegible] पांसूपजीवित्वादकार्यं
तत्तस्य॥ तेन तत्पदस्य पांसुनाशे नैकहायनीनयनं पुनः कार्यं॥ तथा पुरोडाशकपालेन तुषानुपवपति
इति विधिरप्रयोजको रिक्तपात्रस्य॥ पुरोडाशश्रपणे प्रयुक्तकपालोपजीवित्वात् पुरोडाशश्रयुक्तस्यैव तुषोप
वापे विनियोगात्॥ तेन च रौ न कपालेन तुषोपवापः कार्यः॥ त[illegible]त्तरार्द्धात्स्विष्टकृते समवद्यतीत्युत्तरार्धा
र्द्धस्य स्विष्टकृदप्रयोजकत्वं॥ आग्नेयस्य यागादि प्रयुक्तपुरोडाशैकदेशोपजीवित्वात्॥ तेनावच्छेदनराईनाशे
पुरोडाशेन स्विष्टकृत् कार्यः॥ यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा जित्येनैता देवताः परिसंख्याय यय
जेतेति वचनात्॥ तथा च पस्माच्छिन्नस्य पुरा तच्चोदितानि[illegible]तिन प्रयोजकं॥ यागीयद्रव्याभावे विहितानुनिष्पा
दि[illegible]त्वात् तस्य॥ तथा प्रमातानिर्हृ[illegible]यतीति विकल्पयति वेदी प्राणिताः निनयतीति श्रुते[illegible] नेयनम राम ४४
न

प्रयोजकत्वं प्रणीतानीतत्तोयपात्रत्वात् हविःसंयवनार्थत्वात् प्रणीतानां द्वितीययातत्प्रतिपत्त्यर्थीनियमात् न प्रयोज न
कत्वं दुत्वत्रे ॥ आरण्यस्यत्वप्रयोजकमेव ॥ एवं हविःशेषभक्षणादिसर्वप्रतिपत्तीनां आरण्यप्रयोजकत्वात् अन्यथैव न
तस्मात् सोमपानस्य नवारनेव पानपात्रस्य इति मिश्राः ॥ प्रतिपत्तिर्नाम कार्यान्तरतानिवृत्तिः सा च न ह्रदि न
वेति नियमात् [illegible] तद्वारणप्रयोजकत्वे पुत्यत्वेरप्रयोजिका ॥ तदेतत्सर्वं आदिर्यान्त्वविक्षिप्तमुक्तं [illegible] ॥ सा च
रणेमवेदीत्रं परार्थत्वप्रयोजकः ॥ एवमेव प्रसंगस्यादि घ्नाने एवं वेदिविभवितति ॥ सा चारत्रामगदमाण
विशेषं चसं ॥ विशेषणहणे त्यावर्तितित्यर्थोदुक्तं ॥ परार्थं इति विषयसप्तमी ॥ विधेयप्रवृत्तिसामर्थ्यं ॥ एवं विधेयतः
पदार्थानि तेषामादि प्रकारेणानुष्ठापयन् प्रयोगविधिः क्रमनियमे प्रमाणं विधेयत्वे ॥ [illegible] स्यपैपार स्यान्त मुख्य
प्रवृत्तिरूप उडुक्रमात्मोपस्थापित क्रमविशिष्टानेवानुष्ठापयतीति ॥ परत्र [illegible] पौर्वापर्यमानेतावंशेति प्रमो
दूषमनोके च सिद्धः ॥ तथापि प्रयोगविधिः प्रयोगप्राशुभावापन्नेतत्स्वरूपमेवापेक्षते ॥ तदर्पणेहेतुमेव क्र
त्यादीनि बोध्यन्ते ॥ तत्र क्रमपरं वचनं श्रुतिः ॥ यथा वेदं कृत्वा वेदीं करोतीति वेदकरणवेदीकरणयोः प्राप्तः
क्रमपरमेव तद् ॥ [illegible] प्रथममत्र हरेतिक्रम [illegible] विशेष परार्थविधेः ॥ [illegible] पाठावपितदनुकारेण

ना॰
गुण

म

प्राधान्यस्वरूपक्रमविधानेनैकस्मिन्पदार्थे क्रमपरतायां प्राप्ते॥ एकस्यैव हि पदस्यैकरूपेणोद्देश्यत्वविधे
येन वाभाव्यमर्थेन॥ योनद्धः सप्रयमङ्गलिट् ... यो पादेयोर्यत हृदययोर्विनिर्विरूढयोरेकपदप्राप्तिपाठ
त्वासंभवात्क्रमविधिरेव न केवलमङ्गाङ्गित्वनिमित्तं समाख्यादिनिमित्तं च दृश्यते तद्विनियोगतदुक्तिः क्रमपर
45 त्वस्यापि भावाद्भवतीत्यभिप्रायः॥ एवमाग्निहोत्रं गोरघ्नं ... तेतन्त्रतो यज्जुहोतीति श्रुतक्रमपरः॥ अर्थः॥
प्रयोजनं तदधीनक्रमः अग्निहोत्रं जुहोति यवागूं पचतीति यवाग्वा होमार्थत्वात्तदर्थः पाकः पाठक्रम
बाधेन पूर्वं क्रियते सोयमार्थः क्रमः॥ एवमुपहृतपदार्थस्यानुष्ठानन्यायावन्नाधेयमन्त्रो यावन् ठ
पूर्वं कृत्वा द्वितीयस्य मन्त्रपाठक्रमबाधेन नैवपरीत्यं प्रतिपद्यते॥ पाठक्रमस्तु मन्त्रपाठेन ब्राह्मणपा
ठेन यः कल्प्यते यथाग्न्याजारसमिधः समिधो यजति ... त्वादि मन्त्रपाठक्रमेणानुष्ठान
तत् क्रमः॥ मन्त्राणां स्मारकत्वात्तत्क्रमेण स्मर्तृतयानुष्ठानात्॥ अमन्त्रकपदार्थेषु ब्राह्मणपाठेन वस्मार
कत्वात्तत्क्रमेणानुष्ठानक्रमः॥ विरोधे च मन्त्रपाठो ब्राह्मणपाठाद्बलवान्॥ यथाग्नेयाग्नीषोमीययोर्मं
त्रपाठेनैवानुष्ठानं न तु ब्राह्मणपाठेनाग्नेयाग्नीषोमीययोर्ब्राह्मणमेवात्र स्मारकत्वात्तत्क्रमस्यान्त गुण
तत्

त्वात्॥ ब्राह्मणानां त्वर्थीनिष्पत्तिर्व्यापाराणां प्रयोगसंबंधाभावेन तत्क्रमस्य बहिरंगत्वात्॥ स्थानं तूपस्थानेन तद्द्वारेण
क्रमो यथा॥ साद्यस्क्रे सोमयागे सुत्यासह पशूनालभेत इति॥ ज्योतिष्टोमातिदेशेन स्वस्वकाले अग्नीषोमीयसवनीयानुबंध्याः प
शवः प्राप्ताः सह ते शास्त्रबलात् प्राप्तस्य त्र॥ तत्र सवनीयस्थानेऽन्ययोरालंभः॥ प्रधानसोमयागप्रत्यासत्तेः॥ उभयोरेकस्थाना
तिक्रमाश्रयणात्॥ अग्नीषोमीयस्थानेऽन्यानुबंध्यस्य सवनीयस्थाने द्वयातिक्रमः॥ स्यादेव मानुबंध्यस्थाने अग्नीषो
मीयोत्थः॥ तत्रादौ सवनीयस्यालंभः पश्चादितरयोरानुकयोस्तु स्वस्थानादुपस्थितेः॥ तयोर्मध्ये पूर्वमाग्नीषोमीयस्य॥ तत्प्र
वृत्तौ तथा दृष्टत्वात्॥ यद्यपि भिन्नकालत्वादार्थिकं प्रवृत्तौ तयोः पौर्वापर्यं॥ न चार्थिकं बोदकः प्रविशति निवृत्तौ तथापि सदे
हे एकत्र पित्विशेषो व्यवसायकरो भवति इति न्यायेन पूर्वदृष्टत्वमेवात्र निर्णायकमित्याः॥ इति यत्तएवानयोः क्रम इत्तेराण
कः॥ प्रधानक्रमेणांगानां क्रमो मुख्यक्रमः॥ यथाग्नेयादिक्रमेणानिर्वापादिक्रमः एकांगक्रमेणान्यांगानां क्रमः प्रवृत्तिक्रमः॥ यथाव
अपेयेसप्तदशप्राजापत्यान् पशूनालभेत इति समदग्निभ्यः प्रजापतिदेवत्या विहितास्ते संप्रतिपन्नदेवत्यत्वात्सहैकार्थतयानुष्ठा
स्यंते प्रथमेन विध्विना॥ तदंगान्यवारहुपकारकाणीति चेन्न॥ सा - नाधिकानितूपकारार्हाणि दीनि विशेषप्रत्यहणानि प्रति पर्यावृत्त्या॥ तत्रोप
करणं सर्वपशूनां येन क्रमेण वृत्तं तेनैव विनियोजनादीन्यपि कार्याणीति प्रवृत्तितः क्रमः॥ एषांप्र[redacted]नां सर्वेषामसत्र मात्ता
वं बलवान्॥ प्रवृत्तेर्मुख्यक्रमो बलवान्॥ यथा दर्शे ऽग्नेः ग्रेयागं गमात्तं च तत्र वै प्र प्रवृत्तं पश्चादाग्नेयांगवृत्तिः प्रयाज
शेषाभिघारणादि तु प्रधानक्रमेण पूर्वमाग्नेयहविषः पश्चादैन्द्र नतु प्रवृत्तिक्रमेण पूर्वं दध्नः प्रवृत्तिक्रमे ह्यंगानां परस्य
म

भा. सोमेन [illegible] यक्ष्यमाणो [illegible] नाग्यस्य मा [illegible] इति लिङ्गत्वात्सोमस्यापन्नस्य [illegible] प्रा[illegible]लिङ्गः ना [illegible] न्ययागवाच्यत्वा २
९८ रंशत्वासन्निर्वर्तते॥ मुख्यक्रमेत्वङ्गानां प्रधानैः सह प्रत्यासत्तिरनुग्रहतद्भूतिनस्यबलवत्त्वं॥ मुख्यक्रमा[illegible]पाठक्रमो बलवान्॥ यथोपां
गा शुयाज्यनिर्वापः॥ पाठेन पुरोडाशप्रथनको लेनुष्ठेयोन तु मुख्यक्रमेणाग्नेयागव्रीहिनिर्वापानन्तरं स॥ पाठ [illegible]च्चो रा[illegible]तो॥ द्वयो
दि[illegible]श्रुतिः॥ यथा [illegible]नस्यद्वितीयस्थाने ग्रहणं प्राप्ते [illegible]मोदशा मोग्रहतद्भूतिश्रुत्वा द्वायस्थाने ग्रहणं॥ क्रपचितं चैतत्क्रमाण
जातं॥ [illegible]मा सा प्रकाशो नातचर [illegible]रित्यत्रं॥ तेरूपस्थापितमानन्तर्यरूपं क्रमपदार्थो विज्ञेयः ग्राह्य प्रयोगविधिरनुष्ठापयन्ति
46 अनेन क्रमेणपदार्थान्कुर्यादिति॥ भिन्नप्रयोगविधिपरिग्रहीतानां पदार्थानां नायं क्रमो गमनुत्पाद्य[illegible] वीप[illegible]मा मन्त्रं बा[illegible]
ते॥ यथा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति॥ एवं वा[illegible]च प्रथमो यज्ञोयज्ञानां यज्ज्योतिष्टोमः॥ य एतेनानिष्ट्वान्येन य
तत जेतग र्तपत्यमेव प्रवर्तीतेति वा॥ दर्शपूर्णमासोत्तरकालत्वं सोमयागं वाङ्गत्वा विधीयते॥ तदुत्तरकालत्वं वत्तद्भिन्नत्वङ्गत्वे
न विधीयते॥ तेनाहि [illegible]सोमसंस्थाज्योतिष्टोमं तत्त्वोकथ्यषोडश्यतिरात्रसंस्था [illegible]सरस्य[illegible]वर्ष्या॥ एतेनेत्य त्र [illegible] स.
मसंस्थो ज्योतिष्टोमः परामृश्यते तस्य नित्यत्वात्॥ अप्रयमेनेत्य त्र विकृतिमात्र॥ उक्थ्यादि संस्थाप्त्वा [illegible]त्वादिकृतयः॥ पञ्चुवा
मठुकथ्य [illegible] यात् षोडशिना वा [illegible]कामः स्तुवीतातिरात्रेण [illegible]कामयज्ञे तिवा [illegible]सोमयागाङ्गिता राणाक मतेव
सेवंधि रम सोमयागरूपाभिन्नमते समाहितो [illegible]पा उकथ्यादिसंस्थाः पञ्चाय विधीयन्ते फलार्थगुणोभूयाभ्यप्यधर्मास्तिदेवा [illegible]न
दैवमन्यशक्षेनस्स्थानामि [illegible]गहणं [illegible]नालनु [illegible]जिला [illegible]मामिति वाच्या॥ यो वै [illegible]र्थ [illegible]नुमाप घृतद्व्यालिवा
क्य [illegible] तेषामप्युपस्थिते॥ अवे तु भिन्नप्रयोगविधिपरिग्रहीतानामानन्तर्यरूपो विक्रमोगं॥ यथा [illegible] सोमेन यक्ष्यमाणो गृ
म मार [illegible] तनर्तुर [illegible]त्रमिति [illegible]गुधानक [illegible] सोमेन यक्ष्यमाणइति विशेषणमुच्यते॥ तन्नायोगव्याख्या सोमे [illegible] रा ९८
स्यमाणो नान्येनेति॥ हेमादि रयन्व [illegible]कर्तृ [illegible]नसोम [illegible]त्रयकृत [illegible]धे॥ ःअतः सोमेनानन्तरं यक्ष्यमाणइति विशे

घणार्थः॥ तेनाध्वना मेतरमेव सोमं कुर्वन् सोमांगीकृतत्वाद्यादि येन विचारयेदिति वचनार्थः न त्वाध्वनकाल प्रति बंधो
यं॥ यदहरेवैनमश्रद्धोपनमेदथादधीत सोऽवास्य द्विरिति वचनेन तस्य कृतत्वात्॥ तेनाध्वनानंतरं दर्शपूर्णमासौ कृत्वा
सोमकरणो हि इदं पूर्वाध्वनमित्युच्यते॥ सोमस्यैव करणो सोम पूर्वाध्वनमिति पक्षद्वयं त्रैव लिकामां॥ ननु ब्राह्मणस्य॥
सोमपूर्वत्वमेव॥ तं प्रति सोमाद्दर्शमिष्टेः कर्षविधानात्॥ आग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वाग्नीषोमीयो भवति
प यदेवैदं [illegible] पूर्णमासं हविस्तदनुनिर्वपेत् [illegible] सउभयदेवतो भवि [illegible] तिइति॥ अत्र हि पूर्णमास्याउत्कर्षो विधीयते न च
तावितावद्र्शः फलायकल्प्यते॥ तस्मात्क्रमोत्कर्ष इति॥ अत्र केचिन्॥ वचनात् पूर्णमास्या एवोत्कर्षोदर्शस्तु प्रागेव तावदि
विहृतादेव कालमिति॥ अन्ये तु न पूर्णमास्या अपि तु दर्शः किं तु पूर्णमासी अयमेव मां तरसोमो [illegible] भायत इति
सिद्धां तस्तु पूर्णमासं तर्गताग्नीषोमीय पुरोडाशमात्रस्योत्कर्षः [illegible] वोत्तर वाक्यसंदर्भात्॥ न च तावता कृत्स्नोत्कर्षोनिष्क्रम
णकं जाचः कल्प्यितुं॥ वचनानुरोधतयानुष्ठानं एवं सोमोत्तरं प्रथममिति ब्राह्मणस्याप्यपि पक्षद्वयमिति सिद्धे पक्षः तस्मादे
कप्रयोगविधिपरिगृहीतानामेव श्रुत्यादि प्रमाणेष्वक्रमनियमोन्यथा तु वाच्यविकल्प विरोधो वाऽपूर्वमानं तर्यं चेति॥
क एवं नियत एव माणामेवक्रमस्योत्कर्षे तराइत्युत्कर्षो पवक्षेन वर्तस्या पक्ष्वाद्यं उपहूमवत्॥ यथासवनीयपशावाग्निमारुता
दूर्ध्वमनुयाजैश्चरंति त्वनुयाजानामिष्टेरद्धि एतदवोत्तरकालानामाग्निमारुतवाक्येनोत्कर्षमुत्कर्षेविहितेतरादीनां तत्केवा
कालानामुत्कर्षः अनुयाजानंतर्यं हि सत्केवा योगतदा येन पूर्वं विस्मोपेणः कत्वा येविकुताः स्यात्॥ एवमत्रेपि याव
त्सवनस्य क्रमतो भूर्वयोगपत्ताच्च॥ तत एव पुरोडाशाग्नेयाग्नी हविः प्रायानीपि कृत्स्नेय होमानामेते रनुयाजेः पुरोडाशसो

ना॰ ५५ पशुर्वेदिस्तिष्ठपुरोडाशादिद्रव्यपरिग्रहो तैर्नोक्तः॥ निरूढप्रयोगविधिपरिग्रहे तु निबद्धक्रमत्वाभावात् एवं तिष्ठन्तं पशुं प्रयजेदिति
प्रयाजानां प्रकृतो हविरासादनोत्तरकालानामीवति पशावपवर्गे विहितप्रयाजानां तासामभ्यनुक्तानामेवात्र पशुषु
आज्ञायते नियमो हि प्रयाजाङ्गं॥ तद्वा येन क्रियमाणाः प्रयाजा विगुणास्युः तेनाग्रे पर्यग्निकरणं प्रागेव पशुपशुषीयावज्ञे
बहुलोपकर्षः येष्यते च॥ तलेण व्रीहीमांसमनीषोमप्रणयनोत्तरकालिकास्यपाम्नुक्तस्य यच्छेदनस्य दाक्षस्य रूपं पश्येनेति
त्या वेदीहा हन्यपशुर्षविहितेना मिषेणीय आगन्तापकर्षः॥ नेन्त प्रयोगावि धिपरिग्रहे तु निबद्धक्रमत्वाभावात् एवं द
47 शी पूर्णमासयोर्हविरासादनोत्तरकाले प्रमानावेदिः पूर्वेद्युरमावास्यायां वेदीं कृत्वा तिदर्शपूर्वे द्युरपकर्षः प्राप्तानन
देतमपकर्षेति॥ सामान्यतः पाठक्रमस्य क्रमबोधकत्वाग्रेवादिक्रीप्रवचनेनापेक्षबलिमनाप्रयोगविधिपरिग्रहे ऽपि
क्रमस्याभावात् अन्येवदिशान्यत्रोत्कर्षापकर्षादृष्टावितिसंक्षेपः॥ यत्र तु क्रमप्रमाणाभावस्तत्रक्रमानियमं
५ बोधयति यथा प्रयाजानुमन्त्रणमन्त्राणां संततमनूनां प्रीणामात्यादिनां एकोमन्त्रे क्यास्तस्येत्याशानां चप्रारवान्देता ना
म्नातानां॥ एषां हि सर्वे शाखोपसंहारन्यायेनाहवाश्चेत्वेन समुच्चये प्राप्ते सति न किञ्चित्क्रमनियामकं प्रमाणमस्तीत्यनियत
स्वक्रमः अप्रयोगे येन क्रमेण प्रवृत्तिस्तेनैवान्येषामनुपकरणादिति वेद॥ नतथासाहित्यबोधकेन प्रयोगविधिपरि
ग्रहाभावात् तत्र का स्वाय प्रयोगविधिनानुष्ठापितानि पदार्थान् पुंसोपसंक्रियन्ते इति॥ अथैकप्रयोगपदार्थानामेको ऽयं। ए रा॰ ५७
कविधिविहित

एकः

ध्यात्रैकः पदार्थः॥ नत्वेकपवत्सा ज्य॥ तेन चतुरवत्तुरोमुष्टी। त्रिर्वपतीति एतद्द्विधिविहितमनुमुष्टिनिर्वापः पदार्थः॥ तेनाग्नेयाग्नी
षोमीययोस्तावतानुसमयो न त्वेकमुष्टिनिर्वापेः॥ए॥ एवमष्टाकपालान्युपदधातीत्येतद्विधिविहितमसंख्यकपालोपधानमेकः प
पदार्थः॥ तेनाग्नेयादौ तत्तत्संख्यकपालोपधानेनानुसमयः॥ एवंप्रोक्षणपक्षपयःपात्रकरणादीनां पदार्थानुसमयः॥ तथा
चतुरवत्तं जुहोतीत्येतद्विधिविहितावदानादिप्रदानांत एकः अपदार्थः॥ अत्रवाक्ये होमांगत्वेन चतुरवत्तं विधीयत इति
भाष्यकारः॥ सन्तु उपस्तृणाति द्विर्हविषोवद्यति सकृदभिघारयतीति वाक्यांतरप्राप्तचतुरवत्तानुवादेन तत्स्तुतिप
रत्वेन तया होमावयवभूतः प्रत्येको विधीयत इति वार्तिककारः॥ उभयत्रैवेत्व॥ एतद्वये पि द्विर्हविषोवद्यतीति नस्वा
तंत्र्येण द्ववदानविधिः येन नानानेकः पदार्थः स्यात्॥ किंतु चतुरवत्तविध्यपेक्षितमेवावदानेषु समर्पयत्येकत्वमेवेत्ये व
कविधिविहितत्वादवदानादिप्रदानांत एकः पदार्थः॥ तेनानुसमयश्चाग्नेयादौ॥ एवं यत्र विधिनैव दत्तत्राप्येकविध्य
वयवत्वेन विधानादेकपदार्थत्वं॥ यथा व्रीहीनवहंतीति तंडुलनिष्पत्तिकार्यां मवघातभावनायां विहितायां तत्फलजनि
मधस्तादुपस्तृणातीत्यारभ्य त्रिष्फलीकरोतीत्येतैर्विधिभिस्तत्फलभावपत्त्वेनैव तत्तत्पदार्थविधानात्तत्फलजनिनास्त

वना

ना०
राम
७८

ना

रणादि फलीकरणांत एकपदार्थः॥ तेन नाडीजे ऐते तावता प्रतिबीजमनुसमयः॥ यत्र तु पदार्थानुसमये किंचिद्बाधकं तत्र कां-
डानुसमयः॥ यथाश्वप्रतिग्रहेष्टौ पुरोडाशादि सर्वं [illegible] निर्वापादि संस्कार पुरोडाशानामे कदेवत्यत्वा
सह [illegible] प्रयोगे यादेनि र्वापादीनां पदार्थानुसमयः क्रियेत तत्सर्वे [illegible] एव तत्वा [illegible] दापने तु [illegible]
व एकस्यां तत्र तत्रैकस्य निर्वापादि कांडमपवर्ग्यान्यस्य कार्यं॥ एवं पशौ [illegible] बहूयूपपदे [illegible] मजमादि

वा परिव्याणांतानां कांडानुसमयः॥ [illegible] नादि परि [illegible] णांत एव उपमानो [illegible] स्तजे दितिविहितस्य यजमानकर्तृकस्यानव
सर्गस्य पदार्थानुसमये उसंनवा हित्वत्॥ [illegible] क्रमः [illegible] पदार्थानुष्ठापनो [illegible] मनु [illegible] मानस्त
द्विरोधेनैव बोध्यते॥ यथा वेदवेदीकरणयोः [illegible] ते तावत् स्तुते [illegible] यामेदिति [illegible] स्तुत [illegible] मन
[illegible] वक्तानेन क्रमस्य [illegible] यथा श्रुत एवेत्येवं सर्वत्र॥ न चात्र [illegible] मनादि [illegible] श्रुति विरोधः॥ अथ [illegible]
तत्र बल पदार्थबोधकत्वेन स्मृतेः [illegible] प्राबल्यात्॥ गुणान्तु [illegible] क्रमबोधकत्वेन श्रुते दौर्बल्यात्॥ प्रमाण
बलाबलाद्धि क्रमे यबलाबलं बलीयः॥ क्रमे च विरोधे [illegible] विरोधस्य॥ विरोधे [illegible] पर्वकत्वा [illegible]
बलालोचनस्य॥ वस्तुतस्त्वाक्रमनादेः स्तुतादिमिति मुद्धि परिहारार्थत्वेनांगत्वान्न [illegible] त्वमिति नालि [illegible] श्रुति ॥राम ७८॥

नी [illegible]

विरोधः॥

48

तदुक्तं॥ वेदिरेवप्रणीताचमस्यकर्तव्येतोविगुणोभवेत्॥ तामेवसगुणांकर्तुंमुख्यान्तव्याख्यास्यतइति॥ इत्थंसक्रमसांगप्रधानप्र
योगमनुष्ठायैकस्मिन्देशेकालेकेन[illegible]ततोनिरूढप्रयोगोनुष्ठेयइत्यपेक्षायांकालान्तरेणवोचितान्तरंगत्वेनबोध्यय
द तिः॥ तत्रानुपायोदेशान्तरापत्तिःस्मृतिशास्त्रैव॥ समेदर्शपूर्णमासाभ्यांयजेतप्राचीनप्रवणेवैश्वदेवेनयजेते
त्यादिवाक्यप्राप्तस्यपादेयास्समादिदेशाः॥ सहितिविधोपिप्रयोगांतत्वेनबोध्यते॥ कालस्त्वनुपादेयएवदर्शमास्यां
पूर्णमास्यांयजेतसायंजुहोतीत्यादिवाक्यप्राप्तः प्रयोगांगी॥ क्रमयोर्भेदाद्धिप्रयोगभेदः॥ यथावरुणप्रघासस्सर्वप
र्वतिरश्चिणोनेविहारस्वरूपदेशभेदात्॥ दर्शपूर्णमासयोस्तुकालभेदात्॥ यत्रांतुयथाविफलवामएकवकर्तृ
फलमितिनियमात्तत्रापिवरणदक्षिणादानाम्नानात्स्वसिध्यन्तयोरसंभवाद्[illegible]समानेयाः॥ तत्रद ने
र्शपूर्णमासयोःपञ्चहत्वोब्भत्वारऋत्विजःपसुबंधस्ययज्ञस्ततोःषडऋत्विजइत्यादिवाक्यैर्नियतावयांगं॥ तत्र
योक्तकत्वेनचदक्षिणादानस्यकर्तृत्वं॥ दक्षिणाभेदाच्चकर्तृभेदस्तद्भेदाच्चप्रयोगभेदः॥ यथापूर्वोक्तावेष्टौ॥ आग्नेय
मष्टाकपालंनिर्वपेत्रूपकामोदक्षिणोत्ता[illegible]तेनदिशामवेष्ट्योभवतीति॥ तिबहुत्वमुपप

भा॰
राम
४९

५१

घते॥ एवमन्यत्राप्यूह्योऽइत्थमनुष्ठापितस्य प्रयोगस्य प्रागुत्पत्तीर्बोधयति विलंबेमानाभावात्॥ न चात्रापि माना
भावः॥ भवंतं भावयेदनेनेत्युंमित्यंशत्रयस्युक्तभावनायायुगपदनुष्ठानादेकस्याङ्गहिंत्वीमीयते॥ तस्यासंज
वात् प्रागुत्पावकल्पना॥ पदार्थपरिमाणमप्यविशिष्टसमस्तपदार्थानुष्ठानायज्ञेयमिति बोध्यत इति केचि
त्॥ अभ्यासादेवतात्सिद्धेः स्वार्थपदार्थनियमाबनेत्यन्यइति दिक्॥ इत्थमनुष्ठापितं च प्रयोगं नित्यनैमि
त्तिकेषु निमित्तानुरूपचयतावत्प्रयत्नत्वानुरोधेन यथाशक्तीत्युपबध्नाति॥ तेन मुख्याभावे प्रतिनिधिग्रहणा
मंगप्रेषेच प्राप्तेचित मनुष्ठापयति॥ तत्र मुख्यरूपाभावे तत्सदृशएव प्रतिनिधिरुपादेयो यथा व्रीह्य
भावे नीवाराः॥ व्रीहिभिर्यजेतेति व्रीहित्वजातिस्तज्जातिताध्यक्तिस्तद्वारा यागसाधनत्वेन पुरोडाशद्वारा यागांग
त्वेन विधीयते॥ व्रीहिजातेर्जातिव्यक्तोरंगत्वं बाधेत्य पदवयवसादृश्येन नीवारोपादाने तदवयवानां
मंगत्वानुग्रहात् यथाशक्तीत्युपबंधस्तु सादृश्योपादानेववनानुग्रहापत्तेः॥ ननु नैवं छियोक यवोपादाने भवतु
नन्यायतत्त्वप्रतिनिध्युपादानमिति चेत्॥ नवैवं तेलेते पिवकसिन्नंसंघ छियिते न्यस्यपतत्रान्यात्वात्॥ व्रीहिभिर्यजेत राम ४९

इतिसंकल्पयवोपादानेनान्तत्वंवदेतितत्त्वंगम्यतनिषेधातिक्रमःस्यात्॥तद्द्वामपिनिषिद्धंनप्रतिनिधेयं॥यथाय
ज्ञियावैमाषावरकाकोद्रवाइति॥यद्यपिप्रतिनिधौमीमनैस्वरूपेणोपात्तं॥किंतुरूढत्वान्नांमुख्यसदृशावयवानां
तत्प्राप्तिर्नांतरीत्यक्तत्सदृशयुसंबंधोऽस्त्येव॥सदृशपादानोनेतिसिद्धइतिनतेषांप्रतिनिधित्वं॥यदपिप्रति
निधिमुख्यापादानप्रयोगेप्रक्रांतेमुख्यलघ्वंतदातदेवादेयं॥तदसंभवनिमित्तत्वात्प्रतिनिधेःनिमित्तापायेच॥ने
मित्तकाभावात्॥प्रतिनिधिनाप्रधानेनुष्ठितेतुमुख्यलाभेनतदनुरोधेनप्रधानावृत्तिःगुणानुरोधेनप्रधानावृ
त्तेरन्याय्यत्वात्॥यदाप्रधानमात्रंदृष्टमावृत्तीयेहेनीवारादृशेषकार्यपर्याप्तास्तपितदाव्रीहयएवोपादेयास्तेषां
साक्षात्प्रधानांगत्वात्॥शेषकार्याणांतुतदंगत्वादंगांगत्वप्रधानांगस्यबलवत्त्वात्॥एवंयदापशुर्बधानमात्र
रा हृदयस्यावदि[illegible]ष्टिकृष्टरस्तुतद्गुणादिसंस्कारदृष्टोलभ्यतेतदास्यवदितोपादानंहेयं॥यदितुबाधवतिवृएवप्र
तिनिधेः॥यथायदिसोमंनविंदेत्पूतिकानभिषुणुयादितिश्रुतेर्निसोमाभावेपूतिकानांविधिःसोमसादृश्येन
तेषांप्रतिनिधित्वेनप्राप्तेः॥यद्यपितेन्यःसुसदृशानां[illegible]मन्येषामसत्वान्नमीमांसदृशानांप्राप्तिः॥तथापिसर्वस
द

५६ मानाभावात्॥ तथाऽऽहुर प्रार्थप्रयाजादिक्रियापचारे क्रियांतरेण तत्सिद्ध्यज्ञानात् न प्रतिनिधिः तथा मित्रा-एणी इ

भा॰ तीम॰ ५०

या

इत्यत्र ख्योपनिपाते यावन्यायेन सुंदरीनियम्यते तावद्वचनेन मंत्रसद्भावः प्रतिका नियम्यत इति प्रतिनिधिनियम एवायं॥ सु
सर्वविधितो नियमाच्चैनाम वचो॥ यदा न्यायप्राप्त्येन वाचनिकेन वा प्रतिनिधिना प्रक्रमेण स्यापचारः तदानंतसहृत्वमुपा
देयं किंतु मुख्यसदृशं॥ प्रतिनिधेः स्वरूपेणानंगत्वात्॥ तज्जातीनां मुख्यसद्भावयवानामंगत्वात्॥ येषां चि तु न प्रतिनि
धिःय पादेवतायाः॥ यस्मिन्यागे येन शब्देन या विहिता सैव तेनैव शब्देनोद्दिष्टा तत्र देवतेति देवतायाविधिगम्य
८ त्वेनार्थस्वरूपस्यांगत्वात्तदपचारे प्रतिनिधिः॥ न तथा तदुद्देशि ध्वनीत्य च प्रमाणाभावात्॥ [redacted] प्रायश्चित्ताहवनीयादेराधा
नजन्यादृष्टसंस्कारत्वेन तदपचारेन्येन तत्कार्यसिद्धौ दृष्टार्थत्वेपि तदपचारे न सः॥ तत्कार्ये प्रायश्चित्तकरणं॥
उपचरितमात्राणामकरणे कस्य चैव तु प्रतिनिधिरूपादेयः करणे तु सिद्धे कार्ये किं प्रतिनिधिनेति॥ तथाऽयज
मानस्य शोषितस्यान्यत्र व्यापृतस्य वा न तस्य न प्रतिनिधिः॥ फलितं स्वकारावपनादयः शोषितव्यापृतानामयोग्य
यं कार्याः॥ आज्यावेक्षणादयस्तु यजमानविशेषतया ख्याता यज्ञाङ्गत्वसामान्यसमाख्यया यजुषा कार्या
इति किं प्रतिनिधिना॥ मतेन्तु पुरुषांतरोपादाने यद्यादि प्रकर्तानेव कर्तुरभावात् पत्न्यास्त्वस्वतंत्राया अस्वन्ते

ता॰ ५०

न

अतत्कर्तव्यात्त प्रतिनिधिः॥ सत्रादौ सहदक्षामुपक्रमाने ष्वेकस्मिन्मृते संख्यापूरणाय तस्यैव प्रतिनिधिः। यद्यपि प्रति
निहितो न स्वामी मध्ये प्रविष्टत्वात् संख्यापूरणाय सामादिष्टिरानय। नात्र पापि कृत्स्नपदार्थेषु फलिसंस्कारेषु
संख्या कर्तृपरिच्छेदकं संपादनायाने यएवा॥ यथाङ्गाक्रीतपुपबंधात्॥ सत्राणां काम्यत्वे प्यारब्धानां नित्यत्वात्॥ एवमग्नौ
द्विकर्तृणां हृत्वा धावचातादिक्रियाणामुत्तरस्यानित्तप्रतिनिधिरित्युक्तं॥ एतत्प्रायश्चित्तानि यस्य सर्वाणि गृहाणि दग्धे
ना न्तेषु पुरिष्यादिर्वा यथोक्तेन ग्रहणेनार्थवत्त्वनाज्ञावाज्येन यागः कार्यो न होमात्पुनरेव दानं॥ विकृतं पुरोडाशी :प
यमध्ये पर्वाह्नौ पात्रान काव्दा न स्व भाष्यकारमतेयागा हविष्ट्वात्॥ तस्य पुनरसंभवात्॥ वार्त्तिककारम
तेपि सकलपुरोडाशस्य पात्रद्व्यव्याप्तत्वस्य हविष्ट्वात् तस्य च नाशात्॥ एवं स्विष्टकृदाद्यर्थावत्तनाद्योपि
न पुनरेव दानं किं त्वाज्यमङ्गुष्ठपर्वमात्रं विश्वलेखालाद्धो॥ चतुर्भ्रौ करणाद्रे स्तु जोपलन॥ यस्य पुरोडाशः क्षायति तं यदि
निरुपतिर्गृह्णातीति यदा तद्विं क्षिंसंति षट्को यतदेव निर्वपेत् घडो यज्ञस्य प्रायश्चित्तिरिति॥ अत्र ... दाहे पुनः प्र
योगाभावेन्प्रायश्चित्तमेकदेशदाहस्यापवर्जनीयत्वात्॥ त्रिलेनुहोतिस्वकलेजुहोतीत्यत्र न लोकिवं नैंदना

निमित्तंतन्निमित्तहोमस्यफलकल्पनापातात्॥ किंतुप्रकरणाद्युपात्तच्छेदनं हविःस्कंदनेच॥ तत्राविरोधप्रयुक्तेःन समेव
देशाच्छेदनयोर्निमित्तत्वमेवस्कंदनस्यापि॥ नचहोमस्यानित्यत्वकपालसंस्कारत्वात् तस्मिन्निमित्तस्यानुपयोगित्वेनासंस्का
र्यत्वादेकदेशाच्छेदएवहोमइतिवाच्यं॥ नित्यत्वसंस्कार्यत्वेनिमित्ताश्रुतेनित्यवत्कृतंगताहोमस्यस्यात्संस्का
ग्र र्यत्वानित्यमितिनित्यानित्यसंयोगविरोधःस्यात्॥ प्रतीयागच्छेदनंकार्यमितिचापपेत॥ तस्मात्प्रहमान्तुत्या
51 निमित्तच्छेदने॥ नचहविर्द्रव्यभावत्वात्कपालानामेकदेशच्छेदस्यावर्जनीयत्वेन निमित्ततेतिवाच्यं॥ संब
र्पणाच्छेदनयोर्निर्नेकेनैव देशच्छेदस्यवाराधित्वात्॥ होमस्यायंप्रतिच्छेदनमावर्तते प्रतिनिमित्तंनेमि
त्तिकावृत्तिरितिन्यायात्॥ एवंस्कंदनेपि॥ यस्योभयंहविरार्त्तिमाद्येदितिश्रुत्या नैमित्तिंचशारावयागःजावष्ठि
तदर्शांगत्वेनविधीयते॰ नत्वार्त्तिदोषप्रतिनिषेधत्वेन दर्शपंचशारावद्रव्यविधानं॥ आमयागेद्रव्य
विधेर्महेंद्रवल्पितेन्द्रदेवतानियमविधिवाक्यानेदात्॥ इत्ययोद्रमितिपाकृत्यानुवादोनर्थकःस्यात्
॥ नचद्रव्यनाशेनदर्शकर्मलोपनिरूतो तत्कार्यस्यसाधनाकांक्षायामिदंकर्मतत्कार्यापत्तिर्विधीयतांनत

देवत्वेनेतिवाच्यौ ॥ द्रव्यांतरस्यापि संभवेन कर्मनिरूपणाभावात् ॥ अवदानतु द्रव्यनाशनिमित्तवैगुण्यपरिहारार्थत्वे
न तदंगत्वे विरुध्यते ॥ यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदियात्त्रेधा तंडुलान्विभजेत् ये मध्यमास्तानग्नये
दात्रे पुरोडाशमष्टाकपालं निर्वपेत् ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तान्विष्णवे शिपिवि
ष्टाय शृते चरुमिति वाक्ये त्ववदानोपक्रमेनिमित्तदर्शस्येव पूर्वदेवतापनयेन देवतांतरसंबंधो विधीयते
॥ न तु कर्मांतरं प्रकृतहविषां प्रत्यभिज्ञानात् ॥ सत्यां गतौ विशिष्टविध्यादिगौरवायोगाच्च ॥ अथवा तंडुलान्विभजे
दिति अत्र त्रेधा विभागस्य मध्यमादिवाक्येष्वेव सिद्धेरविभजनात्तंडुलपदस्य प्रकृतहविष्पोपलक्षणत्वमा प
श्रित्य हवींषि विभजेदित्यर्थः ॥ विभागस्य संयोगादेपवत्त्वात्पूर्वहे ॥ विधानं च देवतासंयोगेन मध्यमाद्देवताभ्यो
विभागो विधीयते न तस्मात्परित्यक्तयागान्यथानाहविषी देव ॰ तांतरसंयोगापेक्षितो मध्यमादिवाक्येषु विधी
यते ॥ मध्यमानुद्दिश्याग्निर्दाता विधीयते स्थविष्ठानुद्दिश्येंद्रः प्रदाता क्षोदिष्ठानुद्दिश्य विष्णुः शि
पिविष्टः ॥ दात्रादिशब्दानां यौगिकत्वात्तद्द्वय प्रतिपादितैव देवताकार

भा०
दम
५२

रुविभ्रमनान्नवाक्यभेदः॥ सहमिन्द्रपयतीति वाक्येन संप्रतिपन्नोऽयं द्वैतत्पयोर्दधि। छिस्याविरूपोऽमृतन्तरोदिरूपोऽन्नसहमिन्द्रपया

द्विस्त्रतयोरश्चेकरणत्वस्य चरुत्वस्य चाघाहेः॥ उद्देश्यद्वयनिमित्तको वाक्यभेदस्तु वाच्यद्वयेऽगत्यत्वाद्दंगीक्रिय

ते॥ यद्वाम्यत्त्वपर्यान्ते दपि सर्वत्रारकविशिष्टनावगम्यतरविभ्रमनादवावयभेदः॥ तदुक्तं॥ नेवते भावनामात्रं भ

त्वर्थाभेयद्धिश्रुतेरिति॥ एवं च दर्शउपांशुयाजपक्षे तद्वयोऽपि सर्वं देवतापनयोऽस्त्येव॥ देवतांतरासंबंधाच्चतस्य

पञ्चमो लोप एव॥ यद्यपि निमित्तेन निर्वापमुच्यते तथापि मैंकपलिहितो चंद्राभ्युदयोनिमित्तं॥ अस्य हविरन्युयादित्य

त्वस्य तस्य हविषोऽभ्युदयसंबंधस्रोतत्वात् प्रवृत्तं हविरिति बोध्यात्॥ तद्धि ज्ञोपप्रणस्य निर्वापस्याविवक्षितत्वात्।

अतुम्यतुर्दर्शपौर्णमास्योः क्रान्त्या कर्मापक्रमे चंद्राभ्युदयो ज्ञायते इति ज्ञातो नैमित्तिको देवतांतरसंयोगः कार्यो न तु

द्वि दुग्धस्य हविषि तद्धू। हायस्याविवक्षितत्वात् यदा त्वेकं तु द्विनिर्वापानन्तरं चंद्राभ्युदयज्ञानं तदा द्विष्ट निर्वा

पस्य सर्वदेवतापनयेऽपि देवतांतरसंयोगस्यापदार्थे संभवाच्चूर्णीकरणं विनाशो हि संयोगमात्रोपिक्षः पदा त्रा

र्थानयवेपि सन्नवति संयोगस्तु प्राकृतानां पदार्थे नैव हठइति तत्रस्थानापत्त्या वैकृतानामप्यपदार्थेनैव संयोगात्

दम
५२

॥ अथवन्नवतो पि इदं आयक्षितं नैमित्तकं भवति ॥ तस्य दर्भिषताभावेषु इदं रूपसाहित्यस्या विनद्दितत्वात् तंदुलाना
मेव देवतांतरसंयोगसंभवादिति ॥ निरूढाग्नुदये ष्टिस्तु यथा मूल एव इहा यतां ॥ विस्तरो स्यान्त्रातलतौ मन्द्दात्संवार
ऽप्याप्यतां ॥ १ ॥ एवमन्यानि अपभ्रितान्युक्तानि वक्ष्यते वसरइति दिक् ॥ सोयं प्रयोगविधिरंगवाक्यैकवाक्यतापन्नःप्र
त्व धानविधिरेव ॥ तस्य च कृत्स्नत्वात् इहादिवद वेदंइति राणके ॥ लिंगादिकल्पश्रुति वदेद एवेतिमिश्राः ॥ प्रयोगवि
धिराद्यर्थे विषयंगतसंख्यावं ॥ प्रयेतु न बहुद्द ष्टंतु जीवमत्रौ मिकदर्शितं ॥ १ ॥ परश्रासार्यै बोधकौ नियमवि ि.यम
धिः ॥ नियमश्चाप्राप्तांशपूरणं ॥ यथा व्रीहीनवहंतीति ॥ पुरोडाशद्वारा यागसाधनत्वेनावगतानां व्रीहीणां वै
तुष्याकांक्षायां कदाचिद वघातः कदाचिन्नखविदलनमपि प्राप्तेपाक्षाप्यते ॥ तत्रविदलनादिपक्षे वघा
ताप्राप्तेस्तदंशेवघातकर्तव्यतानेन विधीयते ॥ यद्यपिप्राप्तेपाक्षाग न शास्त्रमव्द तेर पूर्वविधिरेवा
यमितिप्रतीयते ॥ तथापि यदि शास्त्रेन स्यात्तदा पक्षः प्रवर्त्तेत ॥ त्याजो यफजतोनियमविधिरितुच्य
ते ॥ अप्राप्तांशपूरणे चावघातस्यतत्ते विदलनादि निवृत्ति र्मवं तृप्तिरकिन विधिफलं प्रणमोपास्थिता

भा० राम ५३

का(मा

नियम एवानुमानवद्रूपस्तत्फलमिति भवति नियमविधिः॥ एवं हविःष्वदे होतीति विरवच्युत्पाद्यत इति अत्र मंत्रवि

स्प रभ्यास विनिर्देशाङ्गानां नियमविधानमिति राणके॥ सर्वाप्यङ्गानामनुवादे नत्विरभ्यास विधिरिति मिश्राः॥

एवं द्वादशाहे पत्नीसंयाजांतान्यहानि संतिष्ठंत इति प्राप्तत्वादङ्गः पत्नीसंयाजांतता नियम्यते॥ द्वाद

रा शानामह्नां सांगानां साहित्येन फलेविधानात् पूर्वेत्तिं हि प्रायणीय सहप्रयोगात्पूर्वभावी दोपसदादीना

मिवोत्तरेषामपि प्रत्यहमनुष्ठानांत्यसहप्रयोगा व्यन्ते किं यतां सहप्रयोग इत्यपेक्षायाम नियमे प्राप्ते

मा पत्नीसंयाजांतान्यहानीत्युदयनीयान्तानां त्वेकेन सहप्रयोग इति नियम्यते॥ सर्वेषु हःसु पत्नीसंयाजांतत्व

53 विधिरैकमेव प्रतिग्रहे सत्यपूर्व विधिः स्यान्नियमविधि रेव तु लाघवा॥ एवं व्रीहि निर्वपेति त्यादि रूढयस्य नि

यमः अवहतौ॥ विहतौ राजन्यापत्नीः संयाजयतीति द्वारीपत्नीपुरस्ययोः पत्नीसंयाजेषु जाता। न्याज्ययो विकल्पि

तयोः पक्षे प्राप्तयोर्नाद्यानीति नियमः॥ शुनास्यापत्न्याप्नोतीति तेनो नियमः विहतौ शुक्लानां व्रीहिणां यवानामि

ति॥ देशकालकर्तृणां नियमविधयः प्रागुक्ता एव॥ एवं क्रियादीनां द्रव्याणां यो विधिः स नियमविधिः॥ तेन॥ स

राम ५३

पर्जन्यः

मित्के यजतिरुद्वेंद्रियकामस्य जुहुयाद्यदि कामयेत वर्षुकं स्यादिति नीचैः सदो मिनुयात्तच मे प्रजाकाम

इत्यपि वाक्यशिष्टे मुपनयीत स्यादीनां व्यावर्तिः॥ व्रात्यापद्दरा ज्ञानावच्छिन्नियमो नवनीतिके चित्॥ यथा व्याख्यातव्यइत्यनेन नवेदोषिका

देरप्यात्मज्ञानार्थं तया। यां त्वा ज्ञाप्तो वेदात स्रवतां नियम्यतद्धूतिनां पर्यंतिरइतिदिक्॥ निवृत्तिफलको विधिः परिसं

ख्याविधिः॥ परिवर्जितैः संख्या बुद्धिः॥ वर्जनबुद्धिहेतुरित्यर्थः॥ सर्वोनयोर्विधेयान्निवर्त्यो नित्यप्राप्तो भवति परि

संख्यात्त्वप्राप्ती फलेदूतिहिंसा॥ व्रीति हवैयइस्योदराति गायत्रीवृहत्यानुष्टुप्वात्रहे यावतीतत्एवोद पं

पं तीति॥ ज्योतिष्टोमे अहिष्वमानादिषु त्रिष्टुवपमानस्तोत्रेषु गायत्र्यादिछंदस्का एव ऋचो विनियुक्तास्तानि

छंदांस्युदरवदन्यहिंतानीतिस्तुतिः॥ इन्द्रस्तोमकेषु एकविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादिषु व

स्तोमपूर्तये समगंतरात्यापोपमन्नसंख्यस्तोमेषु त्रिवृदग्निष्टुरग्निष्टोम इत्यादिषु स्तोमस्थालापर्याप्तुदा

पस्ताचिमो गायत्र्यादिष्वेव कार्यान्यो नोत्रेति नवनार्थः॥ अत्र सर्वस्तो ध्यावा द्वापयो नित्यप्राप्तो पवमानातिरि

त्रे पो

54

रिक्तस्तोत्रेषु तयोः परिसंख्या ख्याद्धी॥ अत्र सेवेत्येवकारेणान्ययोगव्यवच्छेदार्थेन[ता]इतरनिवृत्तिप्रतीतेः इयं श्रौती॥ ला
क्षणिकी तु॥ पंच पंचनखा भक्ष्या इति॥ अत्र पंचानां पंचनखानां शशकादीनां तद्भिन्नानां च युगपद्रागतो नित्य
प्राप्तौ तद्भिन्ननिवृत्तिः परिसंख्या लक्षणया प्रतीयते॥ वाचककपदाभावात्॥ अत एवास्य त्रयो दोषाः श्रुतहानिर
श्रुतकल्पना प्राप्तबाधश्चेति॥ श्रुतपंचपंचनखभक्षणस्य रागप्राप्तत्वेन विधेयताहानं अश्रुतेतरनिवृत्तेः
विधेयताकल्पनं रागप्राप्तापर्यवबाध इति त्र्याह निषेधो द्वावेतौ धर्मनिषेधः॥ इमामगृभ्णन् रशनामृतस्येत्यश्वा
भिधानीमादत्त इति श्रुते वाक्ये फलतः परिसंख्या॥ इष्टकारणाभावे अगर्दभरशनाग्रहणे यो मंत्रस्य लिंगा
नित्यप्राप्तौ संभाविता या मन्त्रवाक्ये गर्दभरशनादाने मन्त्रस्य निवृत्तिः सोच्यते॥ यद्यपि लिंगात्प्राक्
तिप्रवृत्तेरप्राप्ति अन्यायमयं मंत्रविनियोगः प्रयुक्तं नस्यात्तदा लिंगाद्भवादि॥ अन्यो मंत्रः॥ प्राप्नुयादे
वेत्यतोऽगर्दभाभिधान्यादाने निवृत्तिपरोयमिति ज्ञायत इति भवति फलतः परिसंख्या॥ अत्र सर्वत्र

प्राप्तांशमात्रावान्तरनियमः ॥ फलमितीतरनिवृत्तिरेव फलमितिदिक् ॥ एवमेव च त्रिविधो विधिः प्रवर्त्तनाविषयेनेन धर्मे प्रमाणीभू
तश्च ॥ विधिरूपतमप्राप्ते नियमः पाक्षिके सति ॥ तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते इति ॥ निषेधानां निवर्त्तनाबो
धकत्वेन धर्मे प्रामाण्यं निषेधो नञः ॥ तद्युक्तानि वाक्यानि न ब्राह्मणं हन्यादित्यादीनि निषेधा इत्युच्यन्ते ॥ निवर्त्तनाच निवर्त्त त्या
नो कूलो व्यापारः सा च नञोच्यते ॥ ब्राह्मणं हन्यादिति विब्राह्मणवधकर्मकहननप्रवर्त्तनाप्रतीतेर्विधिसंबद्धनञ्प्रत्ययो व्यापा
ने मौ[illegible] वर्त्तयतीति तन्त्रनीतेः ॥ केचित्तु निपातानां द्योतकत्वान्नञः समभिव्याहृतविधेरेव निवर्त्तनायां शक्तिमाहुः तद्धि प्रवर्त्तने
कशक्तिकल्पनापत्तेः ॥ नातीव युक्तं ॥ निपातानां तु न द्योतकत्वं किं तु ख्यातस्येगोपर्यवबोधकत्वं ॥ इहापि विधिसमभिव्या
हृतेन नञा निवर्त्तना बोध्यते ॥ अन्ये तु नञ्विध्योरेव नयोः प्रत्यावप्रवर्त्तनाशक्तयोर्मिलितयोर्निवर्त्तनायां शक्तिमाहुस्त य
दतिक्लिष्टं ॥ तस्माद्विधिना प्रवर्त्तनां हि बाधे पर्यवसायमानः स्वसंबन्धिरूद्धा निवर्त्तना नञा बोध्यते यद् ब्राह्मणं हन्यादिति ने
ति ॥ ननु नञो विधिसंबन्धे स्यादेवं सत्तु ब्राह्मणपदेन संबध्यतामब्राह्मणं हन्यादिति ॥ हननेनैव वा संबध्यतां हनना
भावं कुर्यादिति ॥ अभावस्य चाकार्यत्वासंकल्पोल्लसत्ता प्रधानविध्यबाधयविधिर्निषेधैकरूप्याय च लक्षणागौरवो
न दोष इति चेन्न ॥ सर्वपदार्थानां प्रधानभूतविध्यन्वयदर्शनेन तत्संबन्धस्यापि तत्पाप्रतीतेः ॥ अप्राप्तापदान्वये नञः

भा०
राम
८५६

56

षुबंतस्य वे[illegible]नित्यं समास इति कात्यायनोक्तेः समासापत्तिः॥ हननान्वयेन सूहंत्योर्लक्षणा स्यात्॥ पदमुख्याभावनो
पसर्जनाच्चाद्यर्थः त्वर्थस्य नवाक्यान्तरे पर्यान्वयः॥ अतएवनाख्यातान्निहितुर्या पर्याच नयान्वयस्तयोः समानाभि
धानश्रुत्या प्रदर्शनोपसर्जनत्वात्॥ अतपरिसंख्याद्वि व्यन्वयेनिवर्त्तनान्निचेया॥ वाचनिषेधस्यानिग्रहेतुत्वीविना ध्य
नञटतइति तदाक्षिप्यते॥ तत्रानिष्टपुरुषार्थनिषेधेषु पुरुषः प्रत्यवायः कृत्वर्थनिषेधेषु नानर्थं वदेनास्तियपु
वेपादित्यादिषु क्रतुवैगुण्यमी॥ नन्वेषीपुरुषार्थनिषेधमनुवादि[illegible]मस्तु॥ पर्वणि भुञ्ज्वचर्यस्य पुरुषार्थतया विध्य
नात्॥ क्रतूनां च आयेण पर्वत्ति विध्यनात्॥ अनृतोक्तेवर्जनस्य सदापुरुषार्थतया विध्यनात्॥ पुनःश्रवणपूर्वक[illegible] त्वा
यवाक्रतुयुक्पुरुषधर्मतया विधिरस्तु॥ न तु शुद्धक्रत्वर्थतया यथानं जन्यमानो नुब्रूयान्मधिद रुः कृतइति क्रतुयु
क्तं जन्यमानपुरुषधर्मतया मंत्रो विधीयते॥ मैवं॥ युक्तेन त्रपुषसंयोगेनसवणात्॥ इष्टत्वाख्यातेष क क्रतु न
[illegible]न्निधानात्पुरुषान्नुतेः॥ प्रकरणात् क्रत्वर्थतैव॥ एतेनानुवादपक्षः प्रत्युक्तः॥ तेच निषेधाः प्राप्तिपूर्वा एव॥ अ
न्यथानित्यानुवादता॥ यथान एष्वियामग्नैश्चन्योनां तरिक्षेनदिवि हिरा॥ एष निषेधवचेतव्यमिति॥ आद्योऽत्र
निषेधः प्राप्तिपूर्वत्वात्॥ द्वौ नित्यानुवादौ॥ एवमाजप मानोत्र क्रत्वनतो पक्षो वरो तिन सोमेघरेइतिश्रुतो॥ राम ८६

तत्राप्याद्यो निषेधोऽत्यो नित्यानुवादः॥ सोमयागस्यापूर्वत्वेनाऽप्राप्तप्राप्तेः॥ प्राप्तिश्च रागतो वा शास्त्रतो वा॥ तत्राद्या
गृह्णाति प्रागुक्तेषु॥ द्वितीयातिरात्रे षोडशिनं नातिरात्रे षोडशिनं गृह्णा॰ इत्यादौ शास्त्रप्राप्तसर्वथा निषेधायोगाद्विकल्पः॥ नि स्य
इत्यादिना षेधस्य च स्वमानिष्टहेतुत्वं किंतु करणोन्मुखयोऽन्यथातदभावः॥ कल्पशास्त्रप्राप्ते सर्वथाप्येवं॥ यथा नेतो पक्ष
द्वौ करोतीत्यत्र॥ कल्पस्यातिदेशशास्त्रस्योपजीव्यत्वेन कल्पनानिरोधासंभवात्॥ कश्चित्तस्य च रागादिवत्तं तद्वा द
क्रयोगात्॥ एतद्वय यत्र यदर्थोऽप्राप्तस्तदर्थो निषेधस्तत्रैव॥ यत्र प्राप्तिर्निषेधयोरन्यार्थता तत्र न विकल्पो निषेध
स्यचानिष्टहेतुत्वमस्त्येव॥ यथा दीक्षितो न ददाति न यजति न जुहोतीत्यादौ पुरुषार्थत्वेन प्राप्तस्य होमादेर्नित्य
नकरणं ऋतस्य तच क्रतुवैगुण्यहेतुत्वं॥ यत्र तु निषेधस्य स्वरूपेण किंचिद्बाधकं तत्र न विध्यन्वयेन नञो निषेध
वत्वं किंतु विधिभिन्नान्वयेन पर्युदासत्वं॥ यथाहुः॥ प्रतिषेधः सविज्ञेयः क्रियायाः सह यत्र नञ्॥ पर्युदासः सविज्ञेयो
यत्रोत्तरपदेन नञ्॥ इत्यन्वेतीति शेषः॥ उत्तरपदं क्रियावाचि विधिभिन्नं॥ यथा नानुयाजेषु येयजामहं करोतीति॥ अ
नयजतिषु ह्येयजामहं करोतीति सामान्यशास्त्रादनुयाजेषु प्राप्तं येयजामह इति पदं निषिध्यते चेत्पूर्वोक्तेन न्यायेन

भा०
राम
५७

याजप

विकल्प्य॥ प्राप्नोतीति तद्दृष्य तदनुवादेन नञ् संबध्यते॥ तस्य सामान्यशास्त्रैकवाक्यतया नुयाजवर्जितेषु यजतिषु ये य
जामहं करोतीत्यर्थः॥ तेनात्र विकल्प्यत्वेन पर्युदासः॥ न चैवं षोडशिग्रहणादिषु पर्युदासः संभवति प्राप्त▮शा पक
स्त्रस्यापि विशेषशास्त्रत्वेनैकवाक्यतायां संभवात्॥ यद्यपि नतौ पर्युदासः करोतीत्यत्रातिदेशशास्त्रस्य सामा
न्यशास्त्रत्वेनाद्य॰ नागवर्जमित्येकवाक्यत्वसंभवस्तथापि दर्शपूर्णमासयोरङ्गप्रयाग विधिसमकाल
पा प्रवृत्तस्य पर्युदासस्य तदानीमसतो▮मुक्तादिदेशेनैकवाक्यतासंभव इति तत्र विकल्पात्मकप्रयो
न निषेधत्वं॥ अत्र तेनुपर्युदासस्त्व॥ एवं विधपुति सर्वस्वं ददातीतिशास्त्रादन्यादीनी दानप्रसक्तौ
न केसरिणो ददातीति केसरिभिन्नं सर्वस्वमिति पर्युदासो विकल्पनवादिति मिश्राः॥ राणकेन्तु
तु न यतो वृत्तः प्रतिगृह्णातीत्यसंनमभवं वृत्त्वर्थत्वप्रतिग्रहे साहचर्याद्दास्तेहादिविध्याह्ना यद्दानस्यापि
चतिषेधोपपत्तेः विध्यन्त नाल्पज्ञानत्वाभावाद्विकल्पाभावेन सामान्यविधेः संको▮यी निषेधस्तु चको
कुर्के॥ वार्तिकेप्येवं॥ एवमनारभ्याधीतेष्वप्रवर्ग्यं प्रवृञ्जतीत्यनेन प्रवर्ग्यविधिस्मयपुरस्तादुपसदां पृ ५८

न इतिमघ

प्रवर्ग्यमाचरंतीत्याने नोपसत्स्वर्ग्यकाजसंवत्सरमुपपेदं च ज्योतिष्टोमे विधानाम्नानाद्व्याधीतानीव प्रवृत्तो निवेश इत्यनेन
न्यायेन ज्योतिष्टोमाङ्गं प्रवृत्यसूयते॥ न प्रथमयज्ञे प्रवृंज्यादिति वोपितवीभ्यास ऐतु ज्योतिष्टोमप्रकरणात्त्व प्रवर्ग्येति
यज्ञ वपेदं श्रुतौ॥ अत्र प्रथमयज्ञशब्देनाग्निष्टोमसंस्थज्योतिष्टोमस्य प्रथमः प्रयोग उच्यते॥ प्रथमयज्ञस्य प्रवर्ग्यस्याविवर्जनम् ...
वाचित्यान्तरपठपयेप्रवाच प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम एतद्वा हिताग्न यज्ञ इत्य प्रथमयज्ञाग्रहपतिसमारह प्र
से ज्ञादीक्षित्वासमाप्य प्रावृनेस्तन्नुरस्रा: तत्राप्यासतद्धत्यादौ तत्स्य पकर्मणाए च प्रथमयज्ञशब्देन ग्रहणं न प्रथमप्र
योगस्यतयापि प्रयोगगतत्र्याणिमगुणयोगेन कर्मतो तत्र प्रवर्ग्येर त्रमुख्य स्त्वात्प्रयोगस्येह णं॥ तस्मात्प्रथम
यज्ञमात्मनोतिरात्रेणयजेतेति विहितस्यातिरात्रसंस्थज्योतिष्टोमप्रथमप्रयोगस्यापि प्रथमयज्ञशब्देन ग्रहणमिति
दत्तोत्पत्तिवाक्या सर्वप्रयोगसाधारणेन प्राह्वः प्रवर्ग्यः प्रथमप्रथमप्रयोगद्वये निषिध्यते॥ तेनोत्पत्तिवाक्यविहि यज्ञ
तोयादि प्रयोगविषयं॥ एवं निषिद्धस्याग्निष्टोमे प्रवर्ग्ये प्राप्ते नेनवाक्येनाग्निष्टोमप्रथमप्रयोगे प्रतिप्र
सवः क्रियते॥ तस्मान्नन्यार्थत्वात्तेन तत्र प्रवर्ग्यस्य विकल्प:॥ कामं तु योऽनूचान: स्यात्तस्य प्रवृंज्या
दित्यनेन च कतिकत्पकारिणा प्रतिप्रसववचनस्यानियतत्वक प्रयोगउपसंहारात्तेन वस्तु: अन्यक तक
प्रथमप्रयोगे तु प्रतिषेधादिति वार्त्तिके ... तस्मात्सर्ववनायविकल्पविकल्प:॥ अन
मै

भा० राम पट

यान प्रयोगे नित्यं करणमन्यकर्तृके चाकरणमित्याहुः॥ अतिरात्र प्रथमाहारे तु प्रतिप्रसवाप्राप्तानिषेधेन

ऐन नित्यमकरणं॥ तस्मान्न प्रथमयज्ञ इत्ययं निषेध इति मिश्राः॥ वार्तिके चैवं॥ राणकेतु निषेधे विहित प्रति

मा षिद्धत्वादेव विकल्पसिद्धेः अतिप्रसवाप्राप्तानर्थप्रसंगादतिरात्रप्रथमप्रयोगे पि विकल्पापत्तेः पर्युदासत्व

मार्गे प्रथमप्रयोगवर्जं प्रवर्तनक्षोति। पर्युदस्तस्य चाग्निष्टोमप्रथमाहोरे प्रतिप्रसवाद्द्विरूप्यो तिरात्रप्रथमाह

58 रे तु पर्युदासादकरणमित्युक्तं॥ विस्तरस्त्वाकरे द्रष्टव्यः॥ एवं विकल्पं न यान्तु पपदान्वयेन नञः पर्युदासत्व गु न

मुक्तं॥ क्वचित्तु पक्रमविशेषात्प्राप्त्यन्वयेनोच्यते॥ तस्य व्रतमित्युपक्रम्य नोद्यन्तमादित्यमीक्षेतेत्यादिषु

तं॥ व्रतमनुष्ठेयं तस्मात्तत्कस्योच्यते इत्युपक्रमात्तस्यार्थेन कर्तव्यत्वप्रतीतेर्नञो निषेधत्वे च निवर्तनाप्रतीते

रुपक्रमविरोधापत्ते र्यात्वर्थान्वयेनानीक्षणपरोयं पर्युदासः॥ अभावस्याप्यननुष्ठेयत्वात्तत्र [illegible] व्य

तिरिक्तः संकल्पो नञा जीक्षितोप्यालक्ष्यते॥ सर्वत्र प्रवृत्तिनिवृत्त्योरव्यभिचरितो मानसः संकल्पः॥ तेनोद्य

न्तादित्यानीक्षणसंकल्पेनेष्टं भावयेदिति वाक्यार्थः॥ एतेन तु नाहे नस्याद्युक्तो भवतीति वाक्यशेषाच्चेष्ट

पापक्षयः॥ एवमेवादर्शनेनोद्वीक्षतपसोरनयोरपि॥ वनस्पतित्वमाशीर्षमुक्तमेवमस्य दोषाहोत्वस्यां राम पट

स्मृतौ यस्मिं श्राद्धे नानुष्ठेय व्याधिनोपसंहारात् तत्र विरोधः पर्युदासाश्रयणेन — भोजनसंकल्पो द्वितीयतद्
तिहेमाद्रौ ॥ एवं दाह्निकस्यान्नेनाम्नायादिति निषेधस्य संस्थितेग्निहोमीये दाह्निकस्यान्नमग्नायाविति त्र्याम्नव
चित्र्यवर्णं श्रौतराजकौमोज्या तदूर्ध्वं पर्व वेदे ॥ न चैकस्यावविद्यापेक्षा गुरुलघुनावाच न विकल्पः तुल्यवधे
स्प द्वयान्यथानुपपत्त्या पर्युदासस्तत्र ... त्रयीस्पोवधि ॥ अग्निहोमीयावच्छेदाह्निकतान्न भोजनसंकल्पेनैव भाव
येदिति ॥ द्वितीयवस्तु तत्र त्यैव निषेधेष्येवावच्छेदः सोमसंकल्पावधि दाह्निकतान्नं नभोक्तव्यमिति वार्त्तिके ॥ प्रायद
च नापद्विपत्तया वश्चिद्वयं वस्येतिप्रक्रान्तरं चानाद्रुतौ ॥ माधवेन तु श्रौतराजकवचनस्य स्मार्त्तत्वाच्छ्रुतिविरोधे द
दे नाप्रामाण्यमुक्तौ ॥ दाह्निकेनोनद दाभीत्यो निषेधस्य दोषोमोच नापोवाद्यापोविघ्नेः ॥ तेनदैवान्मानुषाद्व
प्रतिबन्धादवान्नः ॥ चोत्कर्षे दाक्षानुवर्त्तेदोनादिनकार्यं ॥ अग्निहोत्रहोमनिषेधस्य तु अवान्तरयानेनरोदयस्या
नीपेक्षि ॥ एतयापुनराधेयसंमितयेष्ट्या ॥ गेहे ज्ञंसुहोतीतिवचनान्तर ॥ एवं दाह्निकेतावाशनादिनिषेधस्यानादौ
नमित्तत्त्वाद्दाशौचेदाहनापानंतरं प्रवृत्तिः ॥ अग्नौ त्वेवमेकादशाहकृपाते निर्वपेद्दाह्निष्पमाण इतिक्रिया

भा०
राम
५९

पीयीक्रियान्तुपपदे विहितया ८ चट् स्नुत्यादाश्रापर्याहि न रा॥ या गम्यते॥ दंडेन दाच यता त्यादिवाकैस्त दंशादानि वाह्मानिव्य
त्र पर्यानि विधीयं तद्धतिन तता॥ ज्ञानेतरं प्रवृत्तिनिषेधम्नां॥ एवमाहिताग्नेः क्रिन्तेदार्वग्नेनादघ्यादि तिनिषेधस्याधम
नानेतरं प्रवृत्तिः एवमग्निविद्धौतिन जवेदिरुस्य सोमयागेन रेप्रवृत्तिः॥ अग्निचिन्तामयधर्येना। नैसंस्कृतवान् ने
वयमेनाग्नेः संस्कारो या ८ वसोमप्रयोगममाप्यसे मरणानिवीति तदुत्तरमग्निचितत्वात्॥ ए[illegible]सा नीतो न कलैं वं
नद्धये दिव्यादानामुपनयाने नान्तरं प्रवृत्तिः॥ आगुपनयनास्त्वामध्वरवादन्न स्यादिति स्मृते:॥ म९ हापातका
दिनिषेधकानां सर्वदेति सिद्धे प॥ विधौने प्रवेक वा व्यत या तदर्थ ब्रते तस्तुतिनिदार्थत्वेनार्थवादानी [illegible]
वर्णयोः प्रामाण्यं॥ वायव्यं श्वेतमालभेतां भूतिकाम इति। किंचैवा युदेवता[illegible]श्वेतपशुकर्तृकयागभावनायाभूति
कामिकार्या पुरुषप्रवर्तयन्त्य ८ दू[illegible]यापासा[illegible]चार्थोचनायान्त प्रवृत्तिप्रतिबंधकीभूताजस्यनिवर्तिका
प्ररोचनां तदर्थां च स्तुतिमपेक्षते॥ तस्मिन्बो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधा
वति स एवैनं भूतिं गमयतीत्यर्थवादः श्रुतः॥ स स्वार्थपरत्वे वैयर्थ्याज्जक्षणया दि प्रदेवतासौ [illegible]

राम
५९

गः स्थित्रपकल दातत्वात्परत्रा स्तु इतिस्तुवन् विध्य पेदित प्ररोचना ऽननेन वि घ्येकवाक्यतया तद्धो धितं धर्मत्रामाणी
नजते ॥ बर्हिषि रजतं न देयमिति निषेधोयद्यैरजतदानात्पुरुषं निवर्त्तयन्सोकुर्वापमायात निवर्हिष
तिवं धको साह मिवर्त्तकीदृषंतद पीयानि दामपेक्ष्यते ॥ तस्मान्नैवतो ॥ बर्हिषि रजतं दद्यात् ॥ घा स्त्वरास्यसंव
सराद्रुहेरोदनं नवतीत्यर्थवादः ॥ सो ऽरोदीत् यदरोदत्तद्रुद्रस्य रुद्रत्वम् ... तदेकवाक्यतया तद्धोधितं धर्मे प्रामा ॥ यानेनतेनजवेयर्थमेवास्तां केवलं कारणयास्तुति
निंदार्थत्वेनेति वाच्यं ॥ स्वा ध्यायविध्यध्यापितत्वेनानर्थक्यायोगात् ॥ तस्य च बहु प्रार्थत्वात् ॥ तथाहि ॥ स्वा
ध्यायो ध्येतव्य इत्ययमध्ययनविधेनतव्यप्रत्ययेन अध्ययनं कुर्यादिति वाक्येन भावनायां स्वाध्यायस्य कर्मत्वं गमय
ते ॥ तद्वाध्ययनंतया प्राप्यत्वं ॥ तेनाध्ययनेन स्वाध्यायेन ... प्राप्यत्वार्थः ॥ पुनर्थवत्स्य प्राप्यत्वायोगाद
ध्यारेते लौकिकत्वात्पुरुषार्थं वदन्वं कल्प्यते ॥ ... तेन ... येन ... कुर्यात् तत्कुर्यादिति ततः स्वाध्या
योवनेन पाकसत्ववमर्थज्ञानार्थत्वं तस्य लौकिकवर्त्मनि यो ... अर्थवत्त्वात् ॥ तदस्मिन्नवैद्ये फलादिषु

भा०
राम
६०

सामान्ये च्छितनियतकाल [redacted] पूर्णार्थत्वं हस्त्रिया घ भातसत्रादिवाक्यानां पारायणाद्युपयोगित्वमित्येवं कल्प्यते॥ न त्वदृष्टं॥
तेनाधीतेन स्वाध्यायेन यावत्सीमवफलवदर्थज्ञानं कुर्यादिति वाक्यार्थ इति वार्त्तिके र्थवाचिकरणे तत्रोक्तम्॥ मीमां
सारन्तो प्यधीतेन स्वाध्यायेन यज्ञं संसाद्धितं तद्भावयेदित्युक्तं॥ मिश्रास्तु न्यायरत्नमालायां स्वाध्यायसंस्कारेणाध्य
यनेन यच्छक्यते कर्तुं तत्कुर्यादिति बृहस्पतेर्मु-प्रध्ययनं करणव मेव वाक्यार्थं न केवलार्थसिद्धिरस्य प्रयोज
नं॥ इष्टं यच्छक्यते कर्तुं तत्सर्वं फलमिष्यत इत्यादिनाहुः॥ तव वेदोपरुत्वं॥ मुक्तं चेत स्वाध्यायस्य कर्मत्वानुपपत्ता
वपि पदसमूहत्वगताध्ययनस्य करणत्वाबाधायाध्येयनेन गुरुमुखो॥ रणान्यथारणरूपेण प्रहितिरूपं
कुर्यादित्युक्ते लोके शाब्दोच्चारणगोचर भवतो व्यवहारो पवित्रार्थज्ञानस्यैवाहे स्यत्वेन ज्ञातत्वात्तस्मिन्नेवाध्ये
कर्त्रिये सामर्थ्यो स्वाध्यायावाप्तोच्चारेक। जीते स्वाध्यायस्य फलं स्वाधनत्वं विना तदवाप्तोच्चारत्वानुपपत्तेः॥
तस्यापि तत्साधनत्वमपर्याप्तिप्रसक्ति॥ एवं चार्थिकिवाक्यार्थ चिज्ञानं तत्तुपादेयतया स्वाध्यायेकत्वविषयाश्रा
स्वांतरार्थेकरणोत्त्कासंगच्छते॥ दृष्टफलाध्ययनस्यानुजपाद्युपयोगित्वकल्पनाभिरेव प्रयोजनं॥ न चैवम

राम
६०

र्थज्ञानोपयोग्यत्वाभावात्तेनैव भाव्यत्वम् । स्त्विति वाच्यं ॥ यावत्संभवं पुरुषार्थं प्रत्यासत्तेरेव निस्वात् ॥ अर्थज्ञानस्य फल
त्वं पूर्वोपपादितत्वेऽपि स्वव्यतिरिक्तकत्त्वसंबंधं कर्माचेन कृतं पूर्वोपपा । स्थिते रत्रासंभवात् ॥ तेनाध्ययनेन
यावत्संभवमर्थज्ञानं कुर्यादिति वाक्यार्थ इति ॥ कथमित्याकांक्षायां ब्रह्मचर्यगुरुशुश्रूषादिनोपकृतस्ये
तिसंबध्यते ॥ तेषां च धर्माणामविभूत्स्माध्ययनस्वत्वेनाध्ययनस्वरूपोपकारित्वं नियमाज्जादृष्टमितिनि
यमः ॥ जपपारायणादिषु प्रयोगपद्धतिस्वरूपवेदत्वसिध्यर्थत्वं तद्गुणानां नियमस्य पत्वेऽपि अध्ययनस्य तिराग
केण ॥ एवं प्रकृत्याध्ययनविधिः सर्वोपाधिहीनो पुरुषप्रवर्त्तनार्थकत्वं गमयति ॥ प्रभीता विधयः पु
रुषं प्रवर्त्तयेयुः निषेधाः निवर्त्तयेयुरिति ॥ केनेत्यपेक्षायां प्रवर्त्तनाज्ञानेन निवर्त्तनाज्ञानेनेत्यव
संबध्यते प्रवर्त्तनाविषयाशा भावनाभावज्ञानं निवर्त्तनाया ॥ कथमित्याकांक्षायां प्रवर्त्तनाद्वेषाभ्यामुपलक्षि रा
तिसंबध्यते ॥ फलप्रतिषेधवत्वान्न्यायसाहाय्येन व्यक्तिभ्योपकारः प्रकरणस्य यथान्वितौ प्रवर्त्तनीविधिकार्यत्वे
नार्थवादाध्ययनैर्विधिर्बोधयति निषेधकार्यत्वेन निवर्त्तनीप्ररोचनादेमज्जनकयोग्यस्तुतिनिंद

निषेधसमांतिवर्त्तनाधर्त्वै

प्रा०
राम
६१

योऽसावनमपेक्ष्य मात्सौर्यवादान्नावे विधिनिषेधमवे वस्तु सा० धनत्वेन कल्प्यपति। यथोक्तं विध्युद्देशाद्येन
देशाद्वा कल्पयिष्यमहति॥ यथावसरं तावत्कपिंजलानालभेतेत्यादिषु विधिष्वर्थवादाभावाद्विधेस्तु तिरा
कृयोत्कल्पने ऽर्थवादसद्भावे तु तद्वैयर्थ्यपरिहाराय संनिहितविधिनिषेधैकवाक्यतानुसारेणाक
तितिदार्थत्वं॥ न द्दुणापाकल्पयति॥ ननु तद्दृष्ट्यनमदृष्टार्थं बोधयति॥ ज द्दुणापादयत्वेनाद्दष्ट
कल्पनातोलाभवात्॥ एवमर्थवादपदैर्थैर्वै बलद्दृणा॥ नच प्रतिपदं शाकल्यान्तोष्येव यतप्रणीति कुल
जर्नः॥ वाक्यार्थलक्षणाव देकस्यापेक्षलक्षणायाः कल्पनात्॥ तच्च वेतावत्प्रोक्तं सिद्धार्थानुवादिनोर्थवा
दापत्यावापुर्वैहि विष्टादेवतेत्यादयस्त्वस्यार्थसंबंधेन स्तुतिं लक्षयंति॥ येतु मानान्तरविरुद्धार्था
यथा यजमानः प्रस्तरो ऽग्निर्ज्योतिरित्यादयस्ते गौण्या स्वार्थसत्यत्वं प्रतिपद्य स्तुतिं लक्षयंति॥ गौणता
मस्त्वार्थनिष्ठ (गुणयोगेन त्वर्थान्तरे वृत्तिः गुणग्रहता सिद्धिरुदाति साद्रूप्यवशीसालम्भमञ्जगसमयन्नेवानस्
द्धे चा॥ तत्र यजमानप्रस्तरत्वत्तसिध्यान्त्यार्थबाधे त्वे यजमानशब्दः प्रस्तरे दर्भमुष्टौ गौणः॥ यजमा ६१